उन्मा

पित्राविष्टमाह।

"प्रेतानां स दिशति संस्तरेषु पिण्डान्
शान्तात्मा जलमपि चापसव्यवस्त्रः।
मांसेक्षुतिलगुड़पायसाभिकाम-
स्तद्भक्तो भवति पितृग्रहाभिजुष्टः"॥

प्रेतानां मृतानां पितृणाम्। दिशति ददाति। अपसव्यवस्त्रः दक्षिणस्कन्धधृतोत्तरीयः॥*॥

नागाविष्टमाह।

"यस्तूर्व्व्यां प्रसरति सर्पवत् कदाचित्
सृक्किण्यौ मुहुरपि जिह्वयावलेढि।
क्रोधालुर्घृतमधुदुग्धपायसेषु-
र्विज्ञेयः स खलु भुजङ्गमेन जुष्टः"॥

प्रसरति सर्पवत् उरसा चलति। सृक्किण्यौ ओष्ठप्रान्तौ॥*॥

राक्षसाविष्टमाह।

"मांसासृग्विविधसुराविकारलिप्सु-
र्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः।
क्रोधालुर्विपुलबलो निशाविचारी
शौचद्विट् भवति स राक्षसैर्गृहीतः"॥

अतिनिष्ठुरोऽतिनिर्दयः॥*॥

ब्रह्मराक्षसाविष्टमाह।

"देवविप्रगुरुद्वेषी वेदवेदाङ्गविच्छुचिः।
आत्मपीड़ाकरोऽहिंस्रो ब्रह्मराक्षससेवितः"॥

अहिंस्रः अहिंसाशीलः॥*॥

पिशाचाविष्टमाह।

"उद्ध्वस्तः कृशपरुषो विरुद्धभाषी
दुर्गन्धो भृशमशुचिस्तथातिलोलः।
बह्वाशी विजनवनान्तरोपसेवी
व्याचेष्टन् भ्रमति रुदन् पिशाचजुष्टः"॥

उद्ध्वस्तः नग्नः। दिगम्बर इति विदेहवचनात्। कृशो निर्मांसः। परुषो रूक्षः। अतिलोलः सर्व्वस्मिन् अन्नपाने लोलुपः। व्याचेष्टन् विरुद्धमाचेष्टन्। ग्रहा हिंसा क्रीड़ा पूजार्थं गृह्णन्ति। अत एवोक्तम्।

"अशुचिं भिन्नमर्य्यादं क्षतं वा यदि वाक्षतम्।
हिंस्युर्हिंसाविहारार्थं सत्कारार्थमथापि वा"॥*॥

तत्र हिंसार्थं गृहीतस्य लक्षणमाह।

"स्थूलाक्षो द्रुतमटनः सफेनवामी
निद्रालुः पतति च कम्पते च योऽति।
यश्चाद्रिद्विरदनगादिविच्युतः स्यात्
सोऽसाध्यो भवति तथा त्रयोदशेऽब्दे॥"

यश्चाद्रीत्यादि यः पर्व्वतादिपतितः सन् ग्रहैर्गृहीत इत्यर्थः। आदिशब्देन भित्तिप्रासादादयो गृह्यन्ते। त्रयोदशेऽब्दे सर्व्व एव देवादिगृहीतोऽसाध्यः॥*॥

देवादीनामावेशसमयमाह।

"देवग्रहाः पौर्णमास्यामसुराः सन्ध्ययोरपि।
गन्धर्व्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यपि॥
पितरः कृष्णपक्षे च पञ्चम्यामपि चोरगाः।
रक्षःपिशाचा रात्रौ च चतुर्द्दश्यां विशन्ति हि"॥

कृष्णपक्षे अमायाम्। प्रायशःपदादन्यत्रापि। तिथ्यभिधानप्रयोजनं लक्षणार्थं तत्र तिथौ बलिदानार्थञ्च॥*॥ ननु यदि देवादयो विशन्ति तदा विशन्तस्ते दृश्यन्ते कथं नेत्यत आह।

"दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा।
स्वमणिं भास्करार्चिश्च यथा देहञ्च देहधृक्॥
विशन्ति न च दृश्यन्ते ग्रहास्तद्वच्छरीरिणाम्"।

दर्पणादीत्यादिशब्देनान्यदपि निर्म्मलद्रवद्रव्यं गृह्यते। छाया प्रतिविम्बम्। स्वमणिं सूर्य्यमणिम्। देहधृक् जीवात्मा॥*॥*॥

अथोन्मादस्य चिकित्सा।

"वातिके स्नेहपानं प्राक् विरेकः पित्तसम्भवे।
कफजे वमनं कार्य्यं परो वस्त्यादिकक्रमः
यच्चोपदेक्ष्यते किञ्चिदपस्मारे चिकित्सितम्।
उन्मादे तच्च कर्त्तव्यं सामान्याद्दोषदूष्ययोः॥
जलादिद्रुमशैलेभ्यो विषमेभ्यश्च तं सदा।
रक्षेदुन्मादिनं यत्नात् सद्यः प्राणहरा हि ते"॥

ते जलादयः॥*॥

'ब्राह्मीकुष्माण्डीफलषड्ग्रन्थाः शङ्खपुष्पिकास्वरसाः।
दृष्टा उन्मादहृतः पृथगेते कुष्ठमधुमिश्राः"॥

अत्र ब्राह्मीति पदं ब्राह्मीस्वरसपरम्। कुष्माण्डीफलं तद्वीजपरम्। षड्ग्रन्थे तु यथाश्रुतार्थमेव। तेनायमर्थः। वरभीकरसतोरा ४ कूटकचूर्णमासा २ मधुमासा ८ पेयः। इत्येको योगः॥ कोहड़के वीजकचूर्णमासा २ कूटकचूर्णमासा २ मधुना संनीयावलेह्यम्। द्वितीयो योगः। महाभरीवचकचूर्णमासा २ कूटकचूर्णमासा २ मधुनावलेह्यम्। तृतीयो योगः॥ शङ्खपुष्पीस्वरसतोरा ४ कूटकचूर्णमासा २ मधुमासा ८ पेयः। चतुर्थयोगः॥*॥

"सिद्धार्थको हिङ्गु वचाकरञ्जौ देवदारु च।
मञ्जिष्ठा त्रिफला श्वेता कटभीत्वक् कटुत्रिकम्॥
समांशानि प्रियङ्गुश्च शिरीषो रजनीद्वयम्।
वस्तमूत्रेण पिष्टोऽयमगदः पानमञ्जनम्॥
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा।
अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहम्॥
भूतेभ्यश्च भयं हन्ति राजद्वारे च शस्यते।
सर्पिरेतेन संसिद्धं सगोमूत्रं तथार्थकृत्"॥

सिद्धार्थकादि॥*॥

"ब्रूयादिष्टविनाशञ्च दर्शयेदद्भुतानि च।
बद्धं सर्षपतैलाक्तं रक्षेदुत्तानमातपे॥
कपिकच्छ्वाथवा तप्तैर्लौहतैलजलैः स्पृशेत्।
कशाभिस्ताड़येत्तं वा सुबद्धं विजने गृहे॥
सर्पेणोद्धृतदन्तेन दंष्ट्रैः सिंहैर्गजैश्च तं।
त्रासयेच्छस्त्रहस्तैश्च शत्रुभिस्तस्करैस्तथा॥
अथवा राजपुरुषा वहिर्नीत्वा सुसंयतम्।
त्रासयेयुर्वधेनैनं तर्ज्जयन्तो नृपाज्ञया॥
देहदुःखभयेभ्यो हि यतः प्राणभयं महत्।
ततस्तस्य शमं याति सर्व्वतो विप्लुतं मनः॥
इष्टद्रव्यविनाशेन मनो यस्याभिहन्यते।
तस्य तत्सदृशप्राप्त्या सान्त्वाश्वासैः शमं नयेत्॥*॥
त्र्यूषणं हिङ्गु लवणं वचा कटुकरोहिणी।
शिरीषस्य करञ्जस्य वीजं गौराश्च सर्षपाः॥
गोमूत्रपिष्टैरेभिस्तु वर्त्तिर्नेत्राञ्जने हिता।
हन्त्युन्मादमपस्मारं तथा चातुर्थकं ज्वरम्"॥

त्र्यूषणाद्यञ्जनम्॥*॥

"कुष्ठाश्वगन्धे लवणाजमोदे
द्वे जीरके त्रीणि कटूनि पाठा।
मङ्गल्यपुष्पी च समान्यमूनि
सर्व्वैः समानाञ्च वचां विचूर्ण्य॥
ब्राह्मीरसेनाखिलमेव भाव्यं
वारत्रयं शुष्कमिदं हि चूर्णम्।
अक्षप्रमाणं मधुना घृतेन
लिह्यान्नरः सप्त दिनानि यावत्॥
सारस्वतमिदं चूर्णं ब्रह्मणा निर्म्मितं पुरा।
हिताय सर्व्वलोकानां दुर्म्मेधानां विचेतसाम्॥
एतस्याभ्यासतः पुंसां बुद्धिर्म्मेधा धृतिः स्मृतिः।
सम्पत्तिः कविताशक्तिः प्रवर्द्धतोत्तरोत्तरम्"॥

मङ्गल्यपुष्पी शङ्खदूली इति लोके। सारस्वतं चूर्णम्॥*॥

"विश्वाजमोदरजनीद्वयसैन्धवोग्रा-
यष्ठ्याह्वकुष्ठमगधोद्भवजीरकाणाम्।
चूर्णं प्रभातसमये लिहतः सर्पि-
र्वाग्देवता निवसति स्वयमेव वक्त्रे"॥

विश्वाद्यं चूर्णम्॥*॥

"क्वाथ्ये विचूर्णिते छिन्ने तत्षोड़शगुणं जलम्।
पादशेषं प्रकर्त्तव्यमेष क्वाथविधिः स्मृतः॥
दशमूली तथा रास्ना वातारिस्त्रिवृता बला।
मूर्व्वा शतावरी चेति क्वाथ्यैस्तु कुड़वैः पृथक्॥
शृते क्वाथे घृतं प्रस्थद्वयं मृदग्निना पचेत्।
कल्कीकृतैर्वक्ष्यमाणद्रव्यैः सम्यक् पुनः पचेत्॥
विशाला त्रिफला कौन्ती देवदार्व्वेलवालुकम्।
स्थिरानन्ता रजन्यौ द्वे प्रियङ्गुः सारिवाद्वयम्॥
नीलोत्पलैलामञ्जिष्ठादन्तीदाड़िमकेशरम्।
विडङ्गं ह्यग्निपत्री च कुष्ठं चन्दनपद्मके॥
तालीसपत्रं वृहती मालतीकुसुमं नवम्।
अष्टाविंशतिभिः कल्कैरेतैः कर्षमितैः पृथक्॥
चतुर्गुणं जलं दत्त्वा पिष्टैस्तद्विपचेद्घृतम्।
महाचैतसनामेदं सर्व्वचेतोविकारहृत्॥
अपस्मारे महोन्मादे मन्देऽग्नौ ज्वरकासयोः।
वातरक्ते प्रतिश्याये शोषे कार्श्ये तृतीयके॥
मूत्रकृच्छ्रे कटीशूले विसर्पाभिहतेषु च।
पाण्ड्वामये तथा कण्ड्वां विषे मेहे गरेऽपि च॥
देवादिहतचित्तानां गद्गदानामचेतसाम्।
शस्तं स्त्रीणाञ्च बन्ध्यानां धन्यमायुर्बलप्रदम्॥
अलक्ष्मीपापरक्षोघ्नं सर्व्वग्रहनिवारणम्।
हन्ति भ्रमं मदं मूर्च्छां मेधास्मृतिमतिप्रदम्"॥

अग्निपत्री अग्निवल्लीति लोके अगिया इति च। महाचैतसं घृतम्॥*॥

अथ देवाद्याविष्टानां चिकित्सा।

"पूजाबल्युपहारेष्टिहोममन्त्राञ्जनादिभिः।
जयेदागन्तुमुन्मादं यथाविधि शुचिर्भिषक्॥
कृष्णामरिचसिन्धूत्थमधुगोरोचनाकृतम्।
अञ्जनं सर्व्वदेवादिकृतोन्मादहरं परम्"॥

कृष्णाद्यञ्जनम्॥*॥

"ऋक्षजम्बुकलोमानि शल्लकी लशुनं तथा।
हिङ्गु मूत्रञ्च वस्तस्य धूपमस्य प्रयोजयेत्॥